# सुन्दरोऽयं जीवलोकः

## आमुखम्

विविधानि सस्यानि, वृक्षलतादयः, पक्षिमृगादयः, सुगन्धप्रसारकाणि नानाविधानि पुष्पाणि, जीवामृतवाहिन्यः नद्यः, सरीसृपकीटादयः इत्येवं बहुविधैः चराचरैः जीवजालैः सम्पन्ना प्रकृतिः सर्वेषां हृदयहारिणी, सर्वाभीष्टप्रदायिनी च भवति। अनेनैव ज्ञायते यत् प्रकृतिस्तु न केवलं मानवाय अपि तु सर्वेभ्यः जीवजालेभ्यः समाना एव। तादृश्याः प्रकृतेः वर्णनात्मिका लघुबालकविता एव संस्कृतभाषाध्ययनप्रारम्भे उचितेति धिया अत्र संयोजिता वर्तते।

मातृभाषायां प्रशस्तानां पदानां समानसंस्कृतपदपरिचायनेन चित्राणि निरीक्ष्य पक्षिमृगादीनां नाम कथनाय छात्राः शक्ताः भवेयुः। बालकविताः श्रुत्वा आस्वदितुं तालात्मकतया अनुगातुम् अवसरः दातव्यः। सुबन्तपदानां प्रथमाविभक्तिपरिचायनं, क्रियापदानां प्रथमपुरुषैकवचनपरिचायनं च अनेन पाठेन लक्ष्यीकरोति। तदनुसारमेव सुन्दरोऽयं जीवलोकः इति पाठभागः आयोजितः।

**पाठस्य नाम - सुन्दरोऽयं जीवलोकः।**

**आशयः - प्रकृतिस्नेहः।**

**उद्देश्यम् - छात्रेषु प्रकृतिस्नेहवर्धनम्।**

**नैपुणी - श्रवणम्, भाषणम्, लेखनम्, आलपनम्।**

**कालांशः - १४**

**आधारग्रन्थाः - अभ्यासमञ्जरी, बालकविता**

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| सुन्दरोऽयं<br>जीवलोकः<br>(बालकविता)<br>प्रकृतिस्नेहः | बालकवितां शृणोति।<br>सतालं कवितामालपति ।<br>चित्रं दृष्ट्वा पक्षिमृगादीनां नामानि वदति लिखति च।<br>वचनानुसारं लिङ्गानुसारं पदानां विवेचनं लेखनञ्च।<br>पट्टिकाकरणम्। अक्षराण्युपयुज्य पदलेखनम्। वाक्यानां कथनं लेखनं च। | बालकवितां शृणोति, तालभावसमन्वितम् आलपति। मातृभाषायां प्रथितानि संस्कृतपदानि विवेचयति।<br>पक्षिमृगादीनां नामानि वदति लिखति चित्रं दृष्ट्वा<br>आशयं वदति। प्रथमाविभक्तिं, अकारान्तपुंलिङ्गम् आकारान्तस्त्रीलिङ्गम्, अकारान्तनपुंसकलिङ्गं, लट् लकारञ्च विवेचयति। |

**सिद्धताप्रवर्तनानि।**

**प्रवर्तनम् - मातृभाषायां विद्यमानानां संस्कृतपदानां विवेचनम्।**

**उद्देश्यम् - छात्राणां मनसि संस्कृतं प्रति रुच्युत्पादनम् ।**

**प्रक्रिया**

अध्यपिका 'भवन्तः संस्कृतं जानन्ति वा?' इति पृच्छति। तदा प्रायेण 'न' इति छात्राः वदेयुः। 'अस्तु तर्हि एकं कार्यं कुर्वन्तु, भवतां परिचितानि मातृभाषापदानि वदन्तु' - इति वदति अध्यापिका। तदानीं छात्राः बहुनि पदानि वदेयुः। तदा अध्यापिका तेषु संस्कृतमूलानि पदानि मातृभाषया श्यामफलके लिखति।

**यथा** - पुस्तकम्, गृहम्, धनम्, मन्दिरम्, वाहनम्, नगरम्, ग्रामम्, मनुष्यन्, पुष्पम्, क्षेत्रम्, नेत्रम्, नयनम्, भूमिः, आकाशम् ...

अनन्तरम् अध्यापिका छात्रान् बोधयति - के उक्तवन्तः भवन्तः संस्कृतं न जानन्ति इति? भवद्भिः उक्तानि पदानि एव मया श्यामफलके लिखितानि। तानि सर्वाणि संस्कृतपदान्येव इत्यादिकम् उक्त्वा छात्राणां मनसि संस्कृतविषये या भीतिरस्ति तस्याः अपनयनं करोति। तथा संस्कृतस्योपरि तात्पर्यं कौतुकञ्च जनयति। पुनः सर्वाण्यपि पदानि मातृभाषया टिप्पणीपुस्तके लिखन्तु छात्राः।

**प्रवर्तनम् - संस्कृतेन परस्परपरिचायनम्।**

**उद्देश्यम् - संस्कृतं सरलम् इति ज्ञापनम्।**

**प्रक्रिया**

अध्यापिका कक्ष्यां प्रविश्य संस्कृतेन स्वनाम वदति। अनन्तरं छात्रान् नामानि पृच्छति, परस्परपरिचायनं कारयति च। साभिनयं करणीयमिदम्।

**यथा** - अध्यापिका - मम नाम राधा। तव नाम किम्?

एकः - मम नाम अश्विन्।

अध्यापिका - मम नाम राधा। तव नाम किम्?

एका - मम नाम रम्या।

एवं सर्वान् पृच्छतु। एवं पौनःपुन्येन कथनेन तव, मम, नाम, किम् ............ इत्यादिकं, तस्य आशयञ्च छात्राः सम्यक् अवगच्छेयुः।

अनन्तरं छात्रैः उक्तानि नामानि अध्यापिका श्यामफलके लिखतु। तेषां संस्कृते कथं प्रयोगः इत्यपि मातृभाषया एव लिखतु। अत्र विसर्गस्योच्चारणमपि सम्यक् ज्ञापनीयमस्ति।

**यथा** -

| **मातृभाषापदम्** | **संस्कृतपदम्** |
|---|---|
| रामन् | रामः |
| हरि | हरिः |
| रम्य | रम्या |
| नन्दिनि | नन्दिनी |
| रघु | रघुः |

अनन्तरम् एतत् सर्वं टिप्पणीपुस्तके लेखनाय निर्दिशतु। पुनः एतस्य अनुबन्धरूपेण एकां 'नामस्मरणक्रीडामपि' चालयतु।

**क्रीडा एषा**

सर्वे मण्डलाकारेण तिष्ठन्ति। तैः साकम् अध्यापिका अपि तिष्ठतु। एकः छात्रः स्वकीयनाम (संस्कृतेन) वदति। द्वितीयः प्रथमस्य, स्वस्य च नाम वदति।तृतीयः प्रथमद्वितीययोः नामनी स्वस्य च नाम वदति। एवं क्रीडा अनुवर्तते। मध्ये येन केनापि कस्यापि नाम विस्मृतं चेत् - नमस्ते! 'तव नाम किम्?' इति तेन प्रष्टव्यम्। तदा तेन यः पृष्टः सः 'मम नाम..........' इति वदेत्। एवं क्रीडायाः नियमान् उक्त्वा क्रीडां चालयतु। अनया क्रीडया सर्वे परस्परं परिचिताः भवेयुः, मिथः मैत्री भवतु , संस्कृतेन क्रीडा कृता , संस्कृतं सरलम् इति च भावना छात्राणां मनसि भवति। एतदर्थं सङ्घे परमतः अष्ट छात्राः भवेयुः।

**प्रवर्तनम् १ - सतालं साभिनयम् आलपनम्।**

**उद्देश्यम् - पाठे रुच्युत्पादनम्। अर्थावबोधः, कविताश्रवणे तात्पर्योत्पादनं च।**

**प्रक्रिया**

अध्यापिका अत्र गायकाः सन्ति वा इति पृच्छति। तदा केचन बालाः केषाञ्चन नामानि वदेयुः।

ततः द्वित्राणां छात्राणां गानालपनाय अवसरं ददातु। तान् प्रोत्साहयतु।

यथा - अध्यापकः एकं श्लोकम् आलपति ।

का त्वं बाले ? काञ्चनमाला
कस्याः पुत्री ? कनकलतायाः ।।
किं ते हस्ते ? तालीपत्रम्
का वा रेखा ? क ख ग घ।।

अस्माकं पाठभागे अपि एकं सुन्दरं गीतमस्ति। गायाम इत्युक्त्वा द्विवारं सतालम् आलपति अध्यापिका । छात्राः अनुगायन्ति च। ततः अध्यापिका तदेव गीतं साभिनयं यथाशक्ति अवतारयति । तदा छात्राः अपि अनुकुर्वन्तु ।

ततः छात्रान् सङ्घान् कृत्वा गीतं साभिनयम् सङ्घेषु अवतारयन्तु। मूल्यनिर्णयाय छात्राणामपि अवसरं ददातु। अध्यापिका अपि मूल्यनिर्णयं करोतु। उत्तमरीत्या अवतारितवन्तः सङ्घाः अभिनन्दनीयाः।

**मूल्यनिर्णयसूचिकाः -**

आशयग्रहणम्।

अक्षरस्फुटता।

उचितः तालः।

उचिताभिनयः।

**प्रवर्तनम् - २ - चित्रनिरीक्षणम्।**

**उद्देश्यम् - संस्कृतपदानां परिचयः।**

पूर्वतनप्रवर्तनेन छात्राः उत्साहिताः भवन्ति। पाठभागे विद्यमानस्य चित्रस्य प्रदर्शनं कृत्वा अध्यापिका एवं वदति - 'पश्यन्तु भवन्तः, अत्र मनोहराणि चित्राणि सन्ति। सुन्दरं प्रकृतिदृश्यं भवति एतत्। अत्र भवन्तः किं किं पश्यन्ति' इति। तदा चित्रे विद्यमानानि कार्याणि मातृभाषया छात्राः वदेयुः। तानि श्यामफलके लिखति अध्यापिका। ततः तेषां सर्वेषां संस्कृतपदान्यपि मातृभाषया लिखति।

**यथा-**

| **मातृभाषायाम्** | **संस्कृते** |
|---|---|
| आन | कलभः/ गजः |
| मान् | हरिणः |
| नाय | शुनकः |
| कुयिल् | पिकः |
| मयिल् | केकी |
| मषविल्ल् | ऐन्द्रश्चापः |
| कुरङ्ङन् | वानरः |
| आम | कच्छपः |
| पूच्च | मार्जारः |
| आकाशम् | गगनम् |
| मरम् | वृक्षः |

एतानि, सर्वाणि एकवारं वाचयित्वा टिप्पणीपुस्तके लेखनाय छात्रान् निर्दिशतु। यथोचितं मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः।**

उपयुक्तता

आशयग्रहणम्।

लेखनम।

**प्रवर्तनम् ३ - चित्रं दृष्ट्वा नामवाचनम्।**

**उद्देश्यम् - लिङ्गभेदज्ञानम् , वचनभेदज्ञानम्।**

**प्रक्रिया**

छात्रान् सङ्घान् करोतु। पाठपुस्तकस्थानि चित्राणि प्रदर्श्य पदपरिचायनं कर्तुम् अध्यापिका बहुवारं पठति। अनन्तरं पदानां वाचनाय छात्रान् निर्दिशतु। सर्वेषां पदानां वाचनानन्तरम् अत्रत्यानां पदानां विशेषताः समानताः च काः? इति विवेचनाय छात्रान् निर्दिशतु। तदा छात्राः विसर्गान्तपदानि, आकारान्तपदानि, मान्तपदानि च सन्तीति वदेयुः। तदा छात्राः अभिनन्दनीयाः। आम्! सत्यम्। भवदुक्तं साधु एव इत्युक्त्वा एवं क्रोडीकरोतु। अत्रोदाहरणेषु विसर्गान्तयुक्ताः पुल्लिङ्गशब्दाः, आकारान्तस्त्रीलिङ्गशब्दाः अम् (अनुस्वार) अन्तयुक्ताः नपुंसकलिङ्गशब्दाः चेति क्रोडीकृत्य श्यामफलके लिखतु। छात्राः तानि टिप्पणीपुस्तके लिखन्तु।

यथा -

| **पुंलिङ्गाः** | **स्त्रीलिङ्गाः** | **नपुंसकलिङ्गाः** |
|---|---|---|
| काकः | अम्बा | सूनम् |
| कलभः | माला | फलम् |
| वानरः | लता | आम्रम् |
| हरिणः | | पुस्तकम् |
| मार्जारः | | |
| शुनकः | | |
| भ्रमरः | | |

**प्रवर्तनम् ४ समुचितपदलेखनम्।**

**उद्देश्यम् - वचनज्ञानं लेखनं च।**

**प्रक्रिया**

चित्रस्याधः समुचितपदपूरणाय छात्रान् प्रेरयतु। प्रवर्तनमिदं वैयक्तिकं भवतु। छात्राणां लेखनानन्तरं तस्य उचितं पूरणं श्यामफलके विलिख्य प्रदर्शयतु। पुस्तकानि परस्परं विनिमाय मूल्यनिर्णयाय निर्दिशतु।

**मूल्यनिर्णयसूचिकाः**

वचनानुसारित्वम्।

अक्षरव्यक्तता।

**यथा -**

| | | |
|---|---|---|
| कमलम् | कमले | कमलानि |
| शशकः | शशकौ | शशकाः |
| महिला | महिले | महिलाः |

**प्रवर्तनम् ५ - लिङ्गानुसारं पट्टिकाकरणम्।**

**उद्देश्यम् - लिङ्गानां विविच्य ज्ञानम्।**

**प्रक्रिया**

प्रवर्तनमिदं वैयक्तिकं भवतु। लिङ्गानुसारं पट्टिकाकरणाय छात्रान् निर्दिशतु। लेखनसमये आवश्यकं साहाय्यमपि ददातु। लेखनानन्तरं तेषां टिप्पणीपुस्तकानि परस्परं विनिमाय मूल्यनिर्णयाय निर्दिशतु। अध्यापिका साधुरूपाणि पट्टिकारूपेण विलिख्य प्रदर्शयतु।

यथा -

| **पुंल्लिङ्गाः** | **स्त्रीलिङ्गाः** | **नपुंसकलिङ्गाः** |
|---|---|---|
| कच्छपः | शुण्डा | चित्रम् |
| भ्रमरः | नौका | फलम् |
| कोकिलः | तूलिका | चन्दनम् |
| वृक्षः | वनिता | पुस्तकम् |
| चापः | | पर्णम् |

**मूल्यनिर्णयसूचिकाः ।**

लिङ्गानुसारित्वम्।

अक्षरशुद्धिः।

**प्रवर्तनम् ६ चित्राणि दृष्ट्वा वाक्यवाचनम्।**

**उद्देश्यम् - वाक्यवाचनसामर्थ्यम्।**

**प्रक्रिया**

प्रवर्तनमिदं प्रदर्शनात्मकं भवतु।अध्यापिका कमपि छात्रम् आहूय साङ्गविक्षेपं गमनाय निर्दिशति। गमनसमये एवं वदतु - 'बालकः गच्छति '। 'बालकः किं करोति? ' इति साभिनयं पृच्छतु। तदा छात्राः 'बालकः गच्छति' इति वदेयुः। ततः बालकं प्रत्यागमनाय निर्दिशतु साभिनयम्। तदा छात्रः आगच्छति। तदा अध्यापकः - 'आम्............. बालकः आगच्छति'। 'बालकः किं करोति?' छात्राः - 'बालकः आगच्छति'।

एवमेव बहूनि क्रियापदानि प्रदर्श्य ज्ञापयितुं शक्यते। छात्राः प्रथमस्तरीया इत्यतः अध्यापिकया सुस्वरं सुव्यक्तं द्वित्रवारम् उत्तरम् उक्त्वा तत्परमेव प्रश्नः प्रष्टव्यः । विषयेऽस्मिन् अवधानता देया।

एवमेव बालिकाम् आहूय अपि एवं रीत्या प्रदर्श्य कारयतु। तदा क्रियापदानां लिङ्गभेदो नास्ति इति छात्राः अवगच्छन्ति।

अन्यानि क्रियापदानि - पठति, लिखति, वदति, हसति, कूर्दति, पश्यति, शृणोति, नृत्यति, धावति, पिबति, खादति .....।

ततः पाठपुस्तकस्थानि चित्राणि दृष्ट्वा वाक्यानि कथयन्तु छात्राः। प्रवर्तनमिदं वैयक्तिकमेव भवतु। उचितं मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः**

नामपदस्य औचित्यम्।

क्रियापदस्य औचित्यम्।

अक्षरशुद्धिः।

**प्रवर्तनम् ७ बालकवितां पठित्वा चित्रानुसारं पूरणम्।**

**उद्देश्यम् - वाक्यज्ञानसम्पादनम्।**

**प्रक्रिया**

बालकवितां पठित्वा चित्रानुसारं पूरणाय छात्रान् निर्दिशतु। प्रवर्तनमिदं वैयक्तिकं भवतु। उचितं साहाय्यमपि करोतु। तेषां लेखनानन्तरम् आदर्शपूरणं लिखित्वा श्यामफलके चार्टपत्रे वा प्रदर्शयतु। छात्राः स्वयं मूल्यनिर्णयं कुर्वन्तु। स्वयं मूल्यनिर्णयेऽपि उचितं साहाय्यं ददातु।

**मूल्यनिर्णयसूचिकाः।**

उचितं वाक्यम्।

अक्षरव्यक्तता।

यथा -

| | |
|---|---|
| वृक्षात् कूर्दति वानरवीरो | हरिणः धावति |
| पिकः गायति | कच्छपपोतः गच्छति |
| प्रसरति शुण्डां कलभसुवीरो | मीवति म्याऊ मार्जारोऽपि |
| सूनं विकसति | |

निर्देशाः - प्रथमपाठ एव अक्षरज्ञानस्य आवश्यकता अस्ति। अस्माकं पाठपुस्तके तृतीयपाठानन्तरमेव अक्षरमाला आयोजिता। एवं चेदपि अध्यापकाः प्रथमपाठस्य पाठनावसर एव यथाशक्ति अक्षरमालायाः परिचायनाय यतन्ताम्। तदर्थम् अभ्यासमञ्जर्याः पञ्चमपुटात् सप्तदशपुटपर्यन्तं प्रतिकृतीः दत्वा परिशीलयन्तु।

**अनुबन्धप्रवर्तनम्।**

**चित्रं निरीक्ष्य पठनम्।**

**प्रक्रिया**

अध्यापिका वचनपरिचायनाय ७ बालकान् आहूय पुरतः १ : २ : ४ इति क्रमेण विन्यसतु। ततः एकम् उद्दिश्य बालकः, बालकद्वयमुद्दिश्य बालकौ, बालकान् उद्दिश्य बालकाः इति साङ्ग्यं वदतु, छात्राः अनुवदन्तु च। ततः अध्यापिकया नीतानि अन्यानि दण्ड-सुधाखण्ड-शिलाखण्डचषकचमसादीनि वस्तून्यपि पूर्वोक्तरीत्या प्रदर्श्य वचनभेदं दृढीकुर्वन्तु।

ततः स्त्रीलिङ्ग वचनज्ञापनाय अपि बालिकाः आहूय १ : २ : ३ इति क्रमेण पुरतो विन्यस्य पूर्वोक्तप्रकारेणैव कारयतु। ततः अन्यानि वस्तूनि प्रदर्श्य अपि प्रवर्तनमिदमनुवर्तताम्। (वस्तूनि - मापिकाः, स्थालिकाः, पेटिकाः..........।)

एवमेव नपुंसकलिङ्ग विषयेपि।

(स्वीकरणीयानि वस्तूनि - पुस्तकानि, पर्णानि, पुष्पाणि, कङ्कणानि फलानि ......... चेति)

## अधिकविस्तरः

**सन्धिकार्याणि।**

१. सुन्दरोऽयं - सुन्दरः + अयम्

सुन्दरस् अयम्। 'ससजुषो रुः' - सकारस्य रेफे सुन्दरर् + अयम्। अतोरोरप्लुतादप्लुते रेफस्य उकारे सुन्दर + उ + अयम्। आद्गुणः इति गुणे - सुन्दरो + अयम्। एङः पदान्तादति - पूर्वरूपे - सुन्दरोऽयम्। एवं - मार्जारोऽपि।

२. निवसन्त्येवम् - निवसन्ति + एवम्।

निवसन्ति + एवम् - इति स्थिते 'इकोयणचि' इति सूत्रेण इकारस्य स्थाने यणादेशे स्थानसाम्याद् यकारादेशः निवसन्त् य् एवं - निवसन्त्येवम्। एवं धावत्यतिरुचिरम्।

३. पिकस्तु -पिकः + तु । विसर्जनीयस्य सः इति सूत्रेण विसर्गस्य सकारे पिकस् तु पिकस्तु इति रूपम्।

നിത്യം നമുക്കായിട്ടാനന്ദമേകുന്ന
വർണാഭയാകും പ്രകൃതി കാണ്മിൻ
മർമ്മരനാദംകേട്ടിങ്ങിതാ സർവ്വരു-
മാനന്ദചിത്തരായ് വാണീടുന്നു
കുയിലിങ്ങു പാടുന്നു, മയിലുമങ്ങാടുന്നു
വാനിൽ വിളങ്ങുന്നു മാരിവില്ലും
വൃക്ഷത്തിൽ നിന്നഹോ ചാടുന്നു വാനരൻ
മാനിതാ പായുന്നു ഭംഗിയോടെ
ആനയോ തുമ്പിക്കരമതു നീട്ടുന്നു
പോകുന്നിതാമയും മന്ദമന്ദം
നായ കുരയ്ക്കുന്നിടയ്ക്കിടക്കിങ്ങിതാ
പൂച്ച കരയുന്നു മ്യാവൂ മ്യാവൂ (മഞ്ജരി വൃത്തം)